**दिनाङ्क :- 17.01.2026**

**प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-असम**

प्रधानमन्त्री नरेन्द्रमोदी अद्य पश्चिमवङ्गस्य असम-राज्यस्य च द्विदिवसीय यात्रायां भविष्यति। प्रवासस्य प्रथमे दिने, मालदा-नगर-रेलस्थानके, गुवाहाटी (कामाख्या)-हावड़ा-नगरयोः मध्ये भारतस्य प्रथमं वंदेभारत्-रेल्-शयन-यानं हरितध्वजं प्रदर्शयिष्यति। सः पश्चिमवङ्गस्य माल्दा-नगरे सार्वजनिककार्यक्रमे सार्द्ध-द्वि-शताधिक-त्रि-सहस्र-कोटि-रूप्यकाणां बहुविध-रेल्-मार्ग-अवसंरचना-परियोजनानां शिलान्यासम् अपि विधास्यति। प्रधानमन्त्री माल्दानगरे चत्वारि नूतनानि अमृतभारत्-एक्स्प्रेस्-रेलयानानि हरितध्वजं प्रदर्शयिष्यति। पश्चात् सायङ्काले, सः असम-राज्यस्य गुवाहाटी-नगरे बोडो-समुदायस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य ऐतिहासिक-सांस्कृतिक-कार्यक्रमे बागुरुम्बा-द्वौ इत्यस्मिन् भागं भजिष्यति।

**प्रधानमन्त्री-स्टार्टअप**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत्, स्टार्ट्-अप्-इण्डिया न केवलं योजना अपितु 'रेन्बो-विज़न्' इत्यस्ति यत् विविधक्षेत्राणि नूतन-अवसरैः सह संयोजयति। नवदिल्ली-नगरे राष्ट्रिय-स्टार्ट्-अप्-दिवसस्य अवसरे, स्टार्ट्-अप्-इण्डिया इत्यस्य दशवर्षाणां पुर्त्यवसरे आयोजिते कार्यक्रमे सम्बोधयन्, प्रधानमन्त्री अवदत् यत्, स्टार्ट्-अप्-इण्डिया-मिशन् केवलं दशवर्षेषु एव क्रान्तिः अभवत्, येन सम्पूर्णे देशे नूतनपरम्परा संवर्धिता अस्ति। प्रधानमन्त्रिणा स्टार्ट्-अप्-वतावरण- व्यवस्थायां महिलानां भूमिकायाः प्रशंसा कृता उक्तं च यत् भारते पञ्चचत्वारिंशत् प्रतिशतात् अधिकेषु मान्यताप्राप्त-स्टार्ट्-अप्-कार्यक्रमेषु न्यूनातिन्यूनं एका महिला-निर्देशिका सहभागिनी वा अस्ति एव।

**[मोदी आन् वुमन् स्टार्टप्-]**

**भाजपा-मुम्बई-निर्वाचनम्**

ठाकरेपरिवारस्य दुर्गं विच्छिन्नं कृत्वा, बृहन्मुम्बई-नगरनिगमस्य (बी. एम्. सी.) इत्यस्य निर्वाचने सप्तविंशत्यधिक द्विशतासनेषु अष्टादशाधिकैकशतासनानि विजित्य भाजपेति दलस्य तथा एकनाथशिन्दे-नेतृत्वे शिवसेना-दलस्य सङ्घटनेन स्पष्टमतं प्राप्तम्। भाजपेति दलेन एकोननवति आसनानि शिन्दे-नेतृत्वे शिवसेना दलेन च एकोनत्रिंशत् आसनानि प्राप्तानि। एवमेव सङ्घटनेन देशस्य समृद्धतमं नागरिकसंस्थां नियन्त्रयितुं आवश्यकं चतुर्दशाधिकैकशतासनानाम् अङ्कानां लक्ष्यं प्राप्तम्।

**प्रधानमन्त्री-मुंबई**

प्रधानमन्त्रिणा नरेन्द्रमोदिना महाराष्ट्रस्य स्थानीय-निकाय-निर्वाचने राष्ट्रिय-जनतांत्रिक-गठबन्धनस्य विजये महाराष्ट्रस्य जनानां कृते आनन्दं कृतज्ञतां च प्रकटितम्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी अवदत् यत् विभिन्नेषु नगरनिगम-निर्वाचनेषु प्राप्तानि परिणामानि सूचयन्ति यत् महाराष्ट्रस्य जनैः सह एन्. डी. ए. इत्यस्य सम्बन्धः इतोऽपि सुदृढः अभवदिति।

**विदेशमंत्रालयः-ईरान** विदेशमन्त्रालयः अवदत् यत् इरान्-देशस्य स्थितिं भारतं निकटतया निरीक्षमाणः अस्ति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत्, तस्मिन् देशे निवसतां भारतीयनागरिकाणां

हिताय यत् उपायम् आवश्यकं तत् कर्तुं भारतं प्रतिबद्धः अस्ति। सः अवदत् यत्, सम्प्रति इरान्-देशे प्रायः नव-सहस्र-नागरिकाः, अधिकतया छात्राः निवसन्ति।

**पोलैण्ड - उप-प्रधानमन्त्री**

पोलैण्ड-देशस्य उप-प्रधानमन्त्री तथा विदेश-मन्त्री राडोस्लाव सिकोरस्की अद्यारभ्य त्रिदिवसीय भारतयात्रायां भविष्यति। रविवासरे श्रीसिकोरस्की राजस्थानस्य जयपुरनगरे जयपुरसाहित्यमहोत्सवे भागं ग्रहीष्यति। यात्रायाः अन्तिमे दिने सः नवदिल्ल्यां विदेशमन्त्रिणा डा. एस्. जयशङ्करेण सह मेलनं करिष्यति।

**महिला-डब्ल्यूपीएल**

महिला - प्रीमियर - लीग - क्रिकेट - स्पर्धामालिकायां गतरात्रौ नवीमुम्बय्या: डॉ डी. वाई. पाटिल - क्रीडांगणे रॉयल - चैलेन्जर्स - बैंगलुरू -दलेन गुजरात - जायंट्स - दलं, द्वात्रिंशत् - धावनाकैः पराजितम्।

**।। इति वार्ता:।।**